International Journal of Sanskrit Research 2024; 10(1): 116-120

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(1): 116-120
© 2024 IJSR
www.anantaajournal.com
Received: 07-11-2023
Accepted: 10-12-2023

**Dr. N Tanuj Vishnuvardhan**
Director, Archaka Training Academy, Endowments, Andhra Pradesh, India

**Corresponding Author:**
**Dr. N Tanuj Vishnuvardhan**
Director, Archaka Training Academy, Endowments, Andhra Pradesh, India

# श्रीपाञ्चरात्रागमसिद्धान्तः शुकपुरीक्षेत्रमाहात्म्यं च

**N Tanuj Vishnuvardhan**

**DOI:** https://www.doi.org/10.22271/23947519.2024.v10.i1b.2808

**प्रस्तावना**

**उपक्रमः**

भगवान् श्रीमन्नारायः सर्वव्यापी भूत्वा सर्वस्यास्य जगतः अभिन्ननिमित्तोपादकारणं भवति। तादृशो हि भगवान् स्वकीयमौपनिषद्वेषं विहाय सकलानां मनुजानां नयनविषयताङ्गतो भूत्वा दिव्यमङ्गलविग्रहरूपेणावततार। तादृश दिव्यमङ्गलार्चावताररूपः तिरुमला, श्रीरङ्गम्, काञ्ची (हस्तिगिरि) इत्यादि दिव्यदेशेषु राराजते। तेषु तेषु वैष्णवदिव्यक्षेत्रेषु वैखानस-पाञ्चरात्रागमोक्तप्रकारेण भगवदाराधनं प्रचाल्यते। तत्र तिरुमला क्षेत्रे वैखानसागमोक्तरीत्या, श्रीरङ्ग-हस्तिगिर-यादवाद्रिक्षेत्रेषु पाञ्चरात्रागमोक्तप्रकारेण च भगवदाराधरनमनुष्ठीयते। एवञ्च बहवो वैष्णवाग्रेसराः एतैर्वैष्णवागमोक्तैर्विधानैः भगवन्तं श्रीपतिमर्चयन्तः फलवन्ति दिनानि नयन्ति।

उक्तञ्च –

त्वां पाञ्चरात्रिकनयेन पृथग्विधेन
वैखानसेन च पथा नियताधिकाराः।
संज्ञाविशेषनियमेन तमर्चयन्तः
प्रीत्या नयन्ति फलवन्ति दिनानि धन्याः॥[1] इति।

**पाञ्चरात्रागमपरिचयः**

श्रीमन्नारायणस्य प्रपत्तिमार्गं प्रतिपादयति पाञ्चरात्रागमः। आगमस्यास्य प्रवर्तकोऽपि 'पाञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणस्स्वयम्।' इति महाभारतमोक्षधर्मवाक्येन श्रीमन्नारायण एवेति ज्ञायते।

रात्रं च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम्।
तेनेदं भगवच्छास्त्रं पाञ्चरात्रमिति स्मृतम् ॥[2]

एवम् –

पञ्चेतराणि शास्त्राणि रात्रीयन्ते महान्त्यपि ।
तत्सन्निधौ समाख्याऽसौ तेन लोके प्रवर्तते ॥[3]
तत्परव्यूहविभवस्वभावादिनिरूपणम्।
पाञ्चरात्राह्वयं तन्त्रं मोक्षैकफललक्षणम् ॥[4]

इत्यादिव्युत्पत्तयः दृश्यन्ते पाञ्चरात्रशब्दस्य ।

किन्तु अभिगमन-उपादान-इज्या-स्वाध्याय-योगा इति पञ्चानां भगवत्कैङ्कर्यरूपाणां कर्मणां प्रत्यहमनुष्ठानार्थ प्रतिनियताः पञ्चकालाः यत्र प्रपञ्चिताः तत् शास्त्रं पाञ्चरात्रं इतीदमेव प्रकृतविषयकं भवति।

'पञ्चकालरतश्चैव पाञ्चरात्रार्थवित्तथा।'[5] इति जयाख्यसंहितावचनेन पाञ्चरात्रशास्त्रज्ञानं तदनुरूपपञ्चकालभगवत्कैङ्कर्यप्रतिपादनमेव पाञ्चरात्रपदप्रवृत्तिनिमित्तमिति ज्ञायते। इदं च शास्त्रं शाण्डिल्य-औपगायन-मौञ्जायन-कौशिक-भरद्वाजा इति पञ्चायुधसम्भूतेभ्यः पञ्चभ्यः ऋषिभ्यः एकैकस्मै एकैकस्यां रात्रौ श्रीमन्नारायणेन उपदिष्टमिति, अत एव पाञ्चरात्रमिति अन्वर्थनाम समागतमिति च दृश्यते[6]।

**पाञ्चरात्रसिद्धान्तसारः**

भगवदाराधनमेव सर्वेषां ऐहिकामुष्मिकफलप्रापकं भवतीति तत्रापि प्रपत्तिशरणागत्योः मुख्यहेतुत्वमिति च पाञ्चरात्रे प्रपञ्चितम्। एतादृशः पाञ्चरात्रसिद्धान्तः चतुर्धा भिद्यते।

तद्यथा -

- आगमसिद्धान्तः (स्वयं व्यक्तसिद्धान्तः)
- मन्त्रसिद्धान्तः (दिव्यसिद्धान्तः)
- तन्त्रसिद्धान्तः (सैद्धसिद्धान्तः)
- तन्त्रान्तरसिद्धान्तः (आर्षसिद्धान्तः)[7]

एतेषामेव क्रमेण वेद-दिव्य-तन्त्र-पुराणसिद्धान्ता इति नामान्यपि वर्तन्त इति पाञ्चरात्र-रक्षायामुपवर्ण्यते।

**सिद्धान्तचतुष्टयफलम्**

आगमाख्यं हि सिद्धान्तस्सन् मोक्षफलप्रदम्।
मन्त्रसंज्ञं हि सिद्धान्तं सिद्धमोक्षफलं नृणाम्॥
तन्त्रसंज्ञं हि सिद्धान्तं चतुर्वर्गफलप्रदम्।
तन्त्रसारं हि सिद्धान्तं वाञ्छितार्थफलप्रदम्॥[8]

एवञ्च श्रीपाञ्चरात्ररक्षायां पाञ्चरात्रसिद्धान्तानां स्वरूपलक्षणफलानि एवमभिहितानि।

1. **आगमसिद्धान्तः** कर्मफलसन्न्यासपूर्वकं वासुदेवादिव्यूहान् वंशक्रमागतसमानलक्षणलक्षिताभिः मूर्तिभिः विष्णु-सायुज्यप्राप्तये आराधयेदिति यत्र प्रतिपादितं स आगमसिद्धान्तः।
2. **मन्त्रसिद्धान्तः** शङ्ख-चक्राद्यायुधैः श्रीवत्सादिभूषणैः विभूषितां भगवद्दिव्यमूर्तिं परिवारयुतां वा तद्वियुक्तां वा एकामेव मूर्तिम् आराधयेदिति यत्र प्रतिपादितं स मन्त्रसिद्धान्तः।
3. **तन्त्रसिद्धान्तः** सदिग्देवाः सायुधाः प्रादुर्भावगणाः लक्ष्म्या सहापि मत्स्यादिनवानां केशवादिद्वादशमूर्तीनामाराधनं यत्र प्रतिपादितं स तन्त्रसिद्धान्तः।
4. **तन्त्रान्तरसिद्धान्तः** द्विमुख-त्रिमुखमूर्तिभिः सौम्य-सिंहादिमुखैश्च सहिताभिः मूर्तिभिः यत्र आराधनं प्रतिपादितं स तन्त्रान्तरसिद्धान्तः।

एतेषु सिद्धान्तेषु एकं समाश्रित्य असाङ्कर्यानुसरणेन मोक्षः प्राप्यते इति पाञ्चरात्रसिद्धान्तसारः।

पञ्चसंस्कारसंस्कृताः[9] अभिगमनोपादानेज्यास्वाध्याययोगा इति पञ्चकालपरायणास्सन्तः पूर्वोक्तसिद्धान्त-मार्गमनुसृत्य देवमर्चयन्तः 'प्रीत्या नयन्ति फलवन्ति दिनानि धन्याः' इति वत् धन्यं जीवनं ये यापयन्ति, तेषां परमपदप्राप्तिर्भविष्यतीति सारः। मोक्षदशायामपि जीवात्म-परमात्मनोर्भेद एवात्र प्रतिपादितः। एतादृशेन पाञ्चरात्रागमसिद्धान्तमार्गेण प्रचाल्यमानेषु आलयेषु अन्यतमो भवति मम स्वग्रामे तिरुचानूरु (शुकपुरी) क्षेत्रे विद्यमान श्रीपार्थसारथि-पद्मावतीदेव्यालयः।

**शुकपुरीक्षेत्रं प्रति बलरामकृष्णयोरागमनम्**

द्वापरयुगे कुरुक्षेत्रयुद्धानन्तरं बलरामः भगवान् श्रीकृष्णश्च तीर्थयात्रां गच्चन्तौ श्रीशुकाश्रमं प्रति आगतवन्तौ इति पाद्मपुराणप्रमाणैः ज्ञायते। तदा शुकमहर्षिः तयोराराधनं कृत्वा, अत्रैव अर्चारूपेण भवतादिति प्रार्थनां चकार। अत एव इदानीमपि क्षेत्रेऽस्मिन् प्रधानगोपुरद्वारस्य अभिमुखे बलरामकृष्णावेव सन्दृश्येते। विशिष्य गर्भालये अपि श्रीकृष्णः बद्धपद्मासने सुखासीनः, एवं बलरामः वीरासने पादरक्षासहितस्सन् स्थानकरूपेण एकस्मिन् गर्भालये एव विराजते। अनेन तयोः बलरामकृष्णयोः तीर्थयात्रासान्दर्भिकवेषधारणमपि सन्दृश्यते। अतः अयं देवालयः प्रधानतया बलरामकृष्णालय इति ज्ञायते।

**पद्मावतीदेव्याः आविर्भावः**

अनन्तरं भृगुपादताडितविष्णुहृदये वसितुमनिच्छया भूलोकं प्रत्यागतवतीं महालक्ष्मीं पुनः प्राप्तुं अनपायिन्याः अनपायी भूत्वा भगवान् विष्णुः सुवर्णमुखरीनदीतीरं समागत्य कुन्ताख्यायुधेन स्वयं सरोवरमेकं निर्माय, तस्मिन् सरोवरे वायुदेवेन स्वर्गलोकात् समानीतानि स्वर्णपद्मानि संस्थाप्य पद्मप्रियायाः दर्शनार्थं श्रीमन्त्रानुष्ठानम् अत्यन्तकठोरदीक्षया चकार। तत्काले पद्मानां रक्षणार्थं तद्विकसनकार्यार्थं च प्रभाकरं सूर्यं प्रातिष्ठत्। तदारभ्य सरोवरमिदं पद्मसरोवरमिति नाम्ना प्रकीर्त्यते। विशिष्यात्र सूर्यः पश्चिमाभिमुखो विराजते। यतः प्रायः बालार्ककिरणेभ्यः वृद्धार्ककिरणान्येव सुकरानीति शास्त्रसिद्धत्वात् अत्रायं विशेषो दृश्यत इत्यनुमीयते।

एवं द्वादशवर्षाणि भगवता विष्णुना तपःकार्यं समाचरितम्। ततः त्रयोदशे वर्षे देव्याः आविर्भावः एवं सञ्जातः -

ततस्त्रयोदशे वर्षे कार्तिके शुक्लपक्षके।
पञ्चम्यां शुक्रवारे च मुहूर्ते मन्त्रसंज्ञिके॥
ववुः पुण्याः सुखा वाता उत्तराषाढ तारके।
प्रसन्नं सलिलं सर्वं त्रैलोक्यान्तर्गतं द्विज॥
सुप्रभो भानुमासीत प्रसन्नानि मनांसि च।
ततः पद्मसरोमध्ये तेजोराशिर्महानभूत्॥
बालभानुसहस्राभः सुवर्णसदृशच्छविः।
तन्मध्ये काञ्चनैः पद्मैः निर्मितो रथ उत्तमः॥
पद्मभिर्धृतपार्श्वश्च चतुर्भिर्मदगन्धिभिः।
तन्मध्ये काञ्चने पद्मे सहस्रदलशोभिते॥
तत्पद्मकर्णिकामध्ये पद्मासनसमन्विता।
पद्महस्ता पद्मनेत्री रक्तपद्मपदद्वया॥
सुवर्णपद्ममुकुलद्वयशोभिकुचोन्नता।
स्मेरपद्मरजोगन्धिसमुच्छ्वासमुखाम्बुजा॥
बिम्बाधरसुसंवृद्धस्मितशोभिसुधारसा।
सम्पल्लक्ष्मीसमावासविशालनयनद्वया॥
सर्वरत्नसमुत्क्षिप्तजाम्पूनदविभूषणा।
कर्णिकोत्पलताटङ्कमौक्तिकालकबन्धना॥
आमुक्तमुक्तामकुटकटकाङ्गदकङ्कणा।
विद्युत्पुञ्जप्रतीकाशविचित्राम्बरचित्रिता॥
मन्दस्मितमनोज्ञाङ्गी माधवं वीक्ष्य सादरम्।
कल्हारमालामादाय यक्षकर्दमलेपनाम्॥
सुगन्धितुलसीदूर्वामधूककमलोत्पलाम्।
स्थिता पद्मरथे देवी देवं बीक्ष्य चतुर्भुजम्॥[10]

इत्येतादृशसुलक्षणसम्पन्ना महालक्ष्मीः पद्मावती आलये कुबेरस्थाने प्राञ्मुखी भूत्वा सुवर्णशान्तिविमानगर्भालये विराजते। इयं च लक्ष्मीः पद्मे पद्मासनासीना राराजते। भगवतः विष्णोस्तपसा समाविर्भूता लक्ष्मीः एव तदारभ्य क्षेत्राधिनायिका अभवत्।

यथा च श्रीपाञ्चरात्रशास्त्रे स्वतन्त्रलक्ष्म्याः प्रतिष्ठार्चनस्नपनोत्सवादयो विद्यन्ते तथैवात्र क्षेत्रे देव्याः आराधनादयः पाञ्चरात्रागमानुसारेण प्रकुर्वन्त्यर्चकादयः। यस्मिन् कस्मिन् वापि वैष्णवदिव्यक्षेत्रे विष्णोरनपायिन्याः लक्ष्म्याः उत्सवादयः विष्णुमतिरिच्य पृथक्तया ध्वजारोहणाद्यवरोहणान्वितरूपेण राजगोपुरात् बहिः नैव क्रियन्ते। किन्तु राजगोपुराभ्यन्तरे एव क्रियन्ते। परन्तु अस्मिन् क्षेत्रे तु अयमेव विशेषः देव्याः वीरलक्ष्म्याः पद्मावत्याः उत्सवादयः राजगोपुराद्बहिः ऋगादिवीथीषु क्रियन्ते। यतः अयमेव विष्णोस्तपः प्रभाव इति, लक्ष्मीविशिष्टत्ववैभवमिति च ज्ञायते। एतादृशं पद्मावतीक्षेत्रं शुकपुरीतिनाम्ना, चिरुतानूरु इति नाम्ना, तिरुचानूरु इति नाम्ना, एवम् अलर्मेल्मङ्गापुरमिति नाम्ना च व्यवह्रियते। क्षेत्रस्यास्य निर्माता भवति शुकमहर्षिः। तद्यथा –

**शुकमहर्षिणाविनिर्मितं श्रीशुकपुरीक्षेत्रम्** –

श्रीशुकपाञ्चरात्रनामकग्रन्थोक्तदिशा तिरुचानूरुदिव्यक्षेत्रं शुकमहर्षिणा विनिर्मितमिति ज्ञायते। शुकमहर्षिणा विनिर्मितत्वादेव क्षेत्रस्यास्य शुकपुरी इति नाम आगतम्। उक्तञ्च श्रीशुकपाञ्चरात्रोत्पत्तिखण्डे –

इत्येवं पाञ्चरात्रञ्च साक्षाद्विष्णुमुखोद्भवम्।
शुकाश्रमस्य मध्ये तु स्वर्णनद्यास्समीपगे।।
शुकपुर्यग्रहारे च वारुण्याञ्च सरोवरे।
लक्ष्या सह समुद्भूताः षड्गोत्राः पाञ्चरात्रगाः।।
तद्ग्रामनगरीमध्ये बिम्बमूर्तिं प्रतिष्ठितम्।
अष्टेत्तरशतान् विप्रान् पाञ्चरात्रकुलोद्भवान्।।
निर्मितं बिम्बपूजार्थं शुकेन परमर्षिणा।
सरोवरस्य प्राग्भागे सर्वलक्षणसंयुतम्।।
प्राक्पश्चिमवीथीश्च दक्षिणोत्तरद्वारकम्।
अनन्तपुरिनाम्ना च अष्टेत्तरशतं गृहम्।।
ब्राह्मणाय ततो दद्यात् शुकेन च महर्षिणा।
शुकदत्तं च ग्रामेण बिम्बमूर्तेश्च तूत्तरे।।
अष्टोत्तरशतं विप्राः पाञ्चरात्रप्रवर्तकाः।
पाञ्चरात्रप्रवक्तारो वेदवेदाङ्गपारगाः।।
महाविप्रो माहाप्राज्ञः स्वयमाचार्य ईरितः।
षड्गोत्राः पाञ्चरात्राश्च दीक्षां दद्यात् धृढव्रतः।।

इत्येवं रूपेण पाञ्चरात्रमतसिद्धान्तदीपिकाग्रन्थे शुकविनिर्मितत्वं तिरुचानूरुक्षेत्रस्य सम्यगुपपादितम्। एतादृशशुकपुरीक्षेत्रे देव्याः नित्यकैङ्कर्यरता भवन्ति पाञ्चरात्रशास्त्रानुयायिनः।

**अर्चनोत्सवादिषु पद्मावतीदेव्याः वैविध्यं वैभवञ्च**

एतादृश्याः पद्मावत्याः प्रतिदिनं सुप्रभातसेवामारभ्य शयनासनाख्य-एकान्तसेवापर्यन्तम् एतानि कैङ्कर्याणि कुर्वन्ति -

**नित्यकैङ्कर्याणि**

सुप्रभात- सहस्रनामार्चन- अष्टोत्तरशतनामार्चन- प्रातराराधन- कळयाणोत्सव-माध्याह्निकाराधन-सहस्रदीपालङ्गरणयुतडोलोत्सव- सायंकालाराधन-शयनासनाख्यानि कैङ्कर्याणि प्रतिनित्यं श्रीपाञ्चरात्रश्रीप्रश्नपाद्मसंहिताद्वयोक्तप्रकारेण समाचरन्ति। एतानि कैङ्कर्याणि नित्यानि। विशिष्य एतानि सर्वाणि कैङ्कर्याणि भोगश्रीनिवासबेरस्य, पद्मावतीदेव्याः धृव-उत्सव-कौतुक-शयनबेराणां च भगवच्छास्त्रोक्तमार्गेण भूतशुध्यादि-मन्त्रासन-स्नानासन-अलङ्कारासन-भोज्यासन-यात्रासन-शयनासनान्तं आसनपञ्चकेन कुर्वन्ति। तथैव आग्नेयकोणस्थसुदर्शन-गरुड-सेनेशमुख्यानां षडोपचारैः, कौबेरस्थानस्थ पराङ्कुश-परकाल-यतिराजप्रमुखानां चुतुरुपचारैः, बलाकिनी-वनमालिन्यादिद्वारदेवतानां च चुतुरुपचारैः आराधनं नित्यं क्रियते।

एवमेव बलरामकृष्णयोः, तद्गर्भालयस्थरुक्मिणीसत्यभामासमेतश्रीकृष्णस्वामिनः, लक्ष्मीनृसंहस्वामिनः एवं चण्डप्रचण्डगरुडयुतश्रीभूसमेतसुन्दरराजस्वामिनः तद्गर्भालयस्थ देवानाञ्च भोज्यासनपर्यन्तं नित्यमाराधनं कुर्वन्ति। तिथि-वार-नक्षत्रादिनिमित्तेषु क्रियमाणानि कैङ्कर्याणि एतानि भवन्ति –

**वारोत्सवाः**

| | |
|---|---|
| सोमवारोत्सवः | सुवर्ण अष्टदल पादपद्माराधनम् |
| बृहस्पतिवारोत्सवः | अन्नकूटोत्सवः |
| भृगुवारोत्सवः | प्रातः पद्मावतीदेव्याः धृवबेरस्य महाभिषेकः, एवमपराह्ने उद्यानवने देव्याः उत्सवबेरस्य स्नपनम्। |
| स्थिरवारोत्सवः | उद्गीथोपासनवत् सामगानेन पद्मप्रियायाः कमलार्चनम्। |

एवमेव प्रतिमासं प्रथमसौम्यवासरे पद्मावतीदेव्याः उत्सवबेरस्य अष्टोत्तरशतकलशाभिषेकः यथाशास्त्रं क्रियते।

**पक्षोत्सवाः**

| | |
|---|---|
| **अष्टम्युत्सवः** | बलरामकृष्णस्वमिनः अभिषेकः |
| **एकादश्युत्सवः** | श्रीभोगश्रीनिवासस्वामिनः, देव्याः कौतुक-शयनमूर्त्योः, नित्यसूरिदिव्यसूरिद्वारदेवानाञ्च अभिषेकः। |

**प्रतिमासोत्सवाः**

| | |
|---|---|
| **रोहिणीनक्षत्रोत्सवः** | श्रीरुक्मिणीसत्यभामासमेतश्रीकृष्णस्वामिनः स्नपनम्, डोलोत्सवः, वीथीभ्रमणोत्सवः, आस्थानञ्च क्रियते। |
| **उत्तराषाढानक्षत्रोत्सवः** | श्रीपद्मावतीदेव्याः उत्सवबेरस्य स्नपनम्, विशेषलक्ष्मीकुङ्कुमार्चनम्, डोलोत्सवः, गजवाहनोत्सवः, आस्थानञ्च क्रियते। |
| **उत्तराभाद्रानक्षत्रोत्सवः** | चण्डप्रचण्डगरुडयुतश्रीभूसमेतसुन्दरराजस्वामिनः तद्गर्भालयस्थ देवानाञ्च स्नपनम्, डोलोत्सवः, वीथीभ्रमणोत्सवः, आस्थानञ्च क्रियते। |

**मासानुरोधेन संवत्सरोत्सवाः**

| | | |
|---|---|---|
| **चैत्रमासोत्सवः** | **उगादिपर्वदिनोत्सवः** | **उगादिपर्वदिने** श्रीपद्मावतीदेव्याः उत्सवबेरस्य स्नपनम्, विशेषालङ्कणम्, पुष्पपल्लक्युत्सवः, पञ्चाङ्गश्रवणम्, आस्थानञ्च क्रियते। |
| वैशाखमासोत्सवः | वसन्तोत्सवः<br>(शुद्धत्रयोदशीप्रभृति पौर्णमासिपर्यन्तम्) | यथाशास्त्रं रक्षाबन्धन-मृत्संग्रहणाङ्कुरारोपणाद्यैः सह चतुस्थानार्चनं, नवकलशस्नपनम्, विशेषालङ्करणम्, स्वर्णतुरुच्च्याख्यवाहनोत्सवः, स्वर्णरथोत्सवञ्च क्रियते। |
| | नृसिंहजयन्त्युत्सवः | श्रीबलरामकृष्णस्वामिगर्भालयस्थ श्रीलक्ष्मीनृसिंहस्वामिनः अभिषेकः, विशेषालङ्कारः, पानकमुद्गान्नादिनिवेदनम् आस्थानञ्च कुर्वन्ति। |
| ज्योष्ठमासोत्सवः | प्लवोत्सवः<br>(शुद्धैकादशीप्रभृति पौर्णमासिपर्यन्तम्) | प्रथमदिने – श्रीरुक्मिणीसत्यभामासमेत श्रीकृष्णस्वामिनः स्नपनम्, विशेषालङ्कारः, आस्थानम्, पद्मसरोवरे प्लवोत्सवः, वीथीभ्रमणोत्सवश्च क्रियते।<br>द्वितीयदिने – श्रीभूसमेतसुन्दरराजस्वामिनः स्नपनम्, विशेषालङ्कारः, आस्थानम्, पद्मसरोवरे प्लवोत्सवः, वीथीभ्रमणोत्सवश्च क्रियते।<br>तृतीयदिने – श्रीपद्मावतीदेव्याः उत्सवबेरस्य पद्मसरोवरमध्यस्थ नीराट्टमण्डपे स्नपनम्, विशेषालङ्कारः, आस्थानम्, पद्मसरोवरे प्लवोत्सवः, वीथीभ्रमणोत्सवश्च क्रियते।<br>चतुर्थदिने – श्रीपद्मावतीदेव्याः उत्सवबेरस्य पद्मसरोवरमध्यस्थ नीराट्टमण्डपे स्नपनादिप्लवोत्सवादयः यथापूर्वं कृत्वा विशेषेण गजवाहनोत्सवः प्रकर्षेण क्रियते।<br>पञ्चमदिने – श्रीपद्मावतीदेव्याः उत्सवबेरस्य पद्मसरोवरमध्यस्थ नीराट्टमण्डपे स्नपनादिप्लवोत्सवादयः यथापूर्वं कृत्वा विशेषेण गरुडवाहनोत्सवः प्रकर्षेण क्रियते। |
| आषाढमासोत्सवः | सुन्दरराजस्वामिनः अवतारोत्सवः<br>(शतभिषानक्षत्रप्रभृति उत्तराभाद्रनक्षत्रपर्यन्तम्) | प्रथमदिने – श्रीभूसमेतसुन्दरराजस्वामिनः स्नपनम्, विशेषालङ्कारः, डोलोत्सवः, शोषवाहनोत्सवः आस्थानञ्च क्रियते।<br>द्वितीयदिने – श्रीभूसमेतसुन्दरराजस्वामिनः स्नपनम्, विशेषालङ्कारः, डोलोत्सवः, हनुमद्वावाहनोत्सवः आस्थानञ्च क्रियते। तृतीयदिने – चण्डप्रचण्डगरुडयुत-श्रीभूसमेतसुन्दरराजस्वामिनः धृवबेरस्य महाभिषेकः, विशेषालङ्कारः, अपराह्णकाले उत्सवबेरस्य स्नपनम्, विशेषालङ्कारः, डोलोत्सवः, गरुडवाहनोत्सवः आस्थानञ्च क्रियते। |
| श्रावणमासोत्सवः | वरलक्ष्मीव्रतोत्सवः | श्रीपद्मावतीदेव्याः धृवबेरस्य सुवर्णवस्त्रालङ्कारः, आस्थानमण्डपे वरलक्ष्मीव्रताचरणम्, स्वर्णरथोत्सवः, आस्थानञ्च क्रियते। |
| | श्रावणपौर्णम्युत्सवः | अध्ययनहोमः |
| | श्रीकृष्णाष्टम्युत्सवः | बलरामकृष्णस्वमिनः अभिषेकः, श्रीरुक्मिणीसत्यभामासमेत श्रीकृष्णस्वामिनः स्नपनम्, विशेषालङ्कारः, डोलोत्सवः, शेषवाहनोत्सवः, नवनीतेन सह विविधान्नप्रसादभक्ष्यफलादिनिवेदनम्, आस्थानञ्च क्रियते। |
| | शिक्योत्सवः<br>(श्रावणबहुलनवम्याम्) | श्रीरुक्मिणीसत्यभामासमेत श्रीकृष्णस्वामिनः स्नपनम्, विशेषालङ्कारः, डोलोत्सवः, वीथीभ्रमणोत्सवः, शिक्योत्सवः च क्रियते। |
| भाद्रपदमासोत्सवः | पवित्रोत्सवः<br>(शुद्धत्रयोदशीप्रभृति पौर्णमासिपर्यन्तम्) | पूर्वदिने - यथाशास्त्रं रक्षाबन्धन-मृत्संग्रहण-वास्तुशान्ति-अङ्कुरारोपणादिक्रियाः।<br>प्रथमदिने - द्वारादिचतुस्थानार्चनं, पवित्रप्रतिष्ठा, नवकलशस्नपनम्, विशेषालङ्करणम् च।<br>द्वितीयदिने - द्वारादिचतुस्थानार्चनं, पवित्रसमर्पणम्।<br>तृतीयदिने - द्वारादिचतुस्थानार्चनं, महापूर्णाहुतिः, कुम्भप्रोक्षणम्, अवभृथस्नपनम्, वीथीभ्रमणोत्सवश्च। |
| आश्वयुजमासोत्सवः | नवरात्र्युत्सवः<br>(शुद्धप्रतिपत्प्रभृति विजयदशमीपर्यन्तम्) | श्रीपद्मावतीदेव्याः उत्सवबेरस्य नवकलशस्नपनम्, विशेषालङ्कारः, डोलोत्सवश्च नवसु दिनेषु प्रतिदिनं क्रियते। विशिष्य विजयदशम्यां गजवाहनोत्सवः क्रियते। |
| कार्तिकमासोत्सवः | ब्रह्मोत्सवः<br>(कार्तिकबहुलद्वादशीत्प्रभृति मार्गशिरसुद्धपञ्चमीपर्यन्तम्)<br>अत्र सौरमानेन कार्तिकमासः गृहीतः।<br>तस्मात् चान्द्रमानात् किञ्चत् कालभेदो भवति। | पूर्वदिने – पद्मावतीदेव्याः धृवबेरस्य मौक्तिककवचसमर्पणम्, लक्षकुङ्कुमाराधनम्, यथाशास्त्रं रक्षाबन्धन-मृत्संग्रहण- अङ्कुरारोपणादिक्रियाः।<br>प्रथमदिने – गजपटेन ध्वजारोहणोत्सवः, द्वारादिचतुस्थानार्चनं, नवकलशस्नपनम्, डोलोत्सवः, विशेषालङ्करणं, शेषवाहनोत्सवः।<br>द्वितीयदिने - द्वारादिचतुस्थानार्चनं, बृहच्छेषवाहनोत्सवः, नवकलशस्नपनम्, डोलोत्सवः, सायं हंसवाहनोत्सवः।<br>तृतीयदिने - द्वारादिचतुस्थानार्चनं, मौक्तिकमण्डपोत्सवः, नवकलशस्नपनम्, डोलोत्सवः, सायं सिंहवाहनोत्सवः।<br>चतुर्थदिने - द्वारादिचतुस्थानार्चनं, कल्पवृक्षवाहनोत्सवः, नवकलशस्नपनम्, डोलोत्सवः, सायं हनुमद्वाहनोत्सवः।<br>पञ्चमदिने - द्वारादिचतुस्थानार्चनं, पल्लक्युवः, तिरुमलक्षेत्रात् सहस्रनाञ्चितहारस्य उत्सवः, तत्समर्पणम्, नवकलशस्नपनम्, वसन्तोत्सवः, सायं गजवाहनोत्सवः।<br>षष्टमदिने - द्वारादिचतुस्थानार्चनं, सर्वभूपालवाहनोत्सवः, तिरुमलक्षेत्रात् श्रीनिवासस्य पादुकानयनम्, नवकलशस्नपनम्, स्वर्णरथोत्सवः, देव्याः गरुडवाहनारोहणाधिकारसिध्यर्थं स्वामिपादुकासमर्पणम्, सायं गरुडवाहनोत्सवः।<br>सप्तमदिने - द्वारादिचतुस्थानार्चनं, सूर्यप्रभावाहनोत्सवः, नवकलशस्नपनम्, सायं चन्द्रप्रभावाहनोत्सवः।<br>अष्टमदिने - द्वारादिचतुस्थानार्चनं, रथाङ्गहोमः, रथबलिः, रथयात्रादानम्, रथोत्सवः, नवकलशस्नपनम्, सायं अश्ववाहनोत्सवः।<br>नवमदिने - पद्मावतीदेव्याः धृवबेरस्य स्वर्णवस्त्रसमर्पणम्, निजवज्रसमञ्चितकिरीट-पद्मधृतोभयहस्त-वरदहस्त-अभयहस्तसमर्पणम्, चतुस्थानार्चनम्, पल्लक्युत्सवः, चूर्णाभिषेकोत्सवः, देव्याः अवतारतिथिं पुरस्कृत्य तिरुमालाक्षेत्रात् श्रीनिवासबहुमानानयनोत्सवः, तत्समर्पणम्, नवकलशस्नपनम्, पद्मसरोवरे अवभृथस्नानम्, सायं वीथीभ्रमणोत्सवः महापूर्णाहुतिः, ध्वजावरोहणम्, पद्मपुराणपठनम्, महाकुम्भप्रोक्षणम्, अपराधक्षमापणम् च क्रियते।<br>अनन्तरदिने – पुष्पयागश्च आचरन्ति। |
| | कैशिकद्वादश्युत्सवः | श्रीवराहपुराणपठनम् |
| | कार्तिकदीपोत्सवः | दीपप्रज्वलनम्, नीराजनम्, दीपभ्रमणोत्सवः। |
| मार्गशीर्षमासोत्सवः | धनुर्मासोत्सवः | धनुर्मासार्चनम्। |
| | **वैकुण्ठ-एकादश्युत्सवः** | श्रीपद्मावतीदेव्याः उत्सवबेरस्य नवकलशस्नपनम्, अलङ्करणम्, वीथीभ्रमणोत्सवश्च। |
| | **वैकुण्ठ-द्वादश्युत्सवः** | पद्मसरोवरतीरे श्रीसुदर्शनस्वामिनः स्नपनम्, अवभृथस्नानञ्च। |
| **पुष्यमासोत्सवः** | **मकरसङ्क्रान्त्युत्सवः** | श्रीपद्मावतीदेव्याः उत्सवबेरस्य नवकलशस्नपनम्, अलङ्करणम्, वीथीभ्रमणोत्सवश्च। |
| | **कनुमपर्वदिनोत्सवः** | उद्यानवने श्रीपद्मावतीदेव्याः उत्सवबेरस्यार्चनम्, विविधान्नादिनिवेदनम्, गो-गजपूजा च। |
| **माघमासोत्सवः** | **रथसप्तम्युत्सवः** | श्रीपद्मावतीदेव्याः उत्सवबेरस्य सूर्यप्रभा-हंस-अश्व-गरुड-शेषवाहनोत्सवाः, नवकलशस्नपनम्, अलङ्करणम्, चन्द्रप्रभा-गजवाहनोत्सवश्च सायं क्रियते। |
| **फाल्गुणमासोत्सवः** | सौरमानानुसारं **"फङ्गुणी उत्तर"** उत्सवः | श्रीपद्मावतीदेव्याः उत्सवबेरस्य स्नपनम्, अलङ्करणम्, वीथीभ्रमणोत्सवश्च क्रियते। |

**उपसंहारः**

इत्येतावता शोधप्रबन्धेन श्रीपाञ्चरात्रागमवैभवं, रात्रशब्दव्युत्पत्तिः, उत्सवविशेषाश्च यथागुरुकृपाबलं प्रपञ्चिताः।। तत्सिद्धान्तस्वरूपभेदौ, विशिष्य पाञ्चरात्रागमोक्तमार्गेणप्रचाल्यमानेषु आलयेषु श्रीपाञ्चरात्रसिद्धान्तो वर्धतामभिवर्धताम्। तिरुचानूरुदिव्यक्षेत्रस्थपद्मावतीदेव्याः नित्यनैमित्तिककैङ्कर्य-

**संदर्भ सूची**

1. शरणागतिदीपिका.श्लो.32
2. नारदपाञ्चरात्रे.पृ.9
3. पाद्मसंहिता.ज्ञान.श्लो.1
4. अहिर्बुध्न्यसंहिता.म.11
5. जयाख्यसंहिता.13.9
6. पञ्चायुधांशास्ते पञ्च शाण्डिल्यश्चोपगायनः। मौञ्जायनः कौशिकश्च भरद्वाजश्च योगिनः ॥ ईश्वरसं.19.519
7. तच्चतुर्धा स्थितं शास्त्रं ऋगादिवदनेकधा। एकैकं भिद्यते तन्त्रं शाखाभेदेन भूयसा ॥
   प्रथमं मन्त्रसिद्धान्तं द्वितीयञ्चागमाह्वयम्। तृतीयं तन्त्रसिद्धान्तं तुरीयं तन्त्रान्तरं भवेत् ॥
   चतुर्चा भेदभिन्नञ्च स्वयं व्यक्तादिभेदतः। स्वयं व्यक्तं हि सिद्धान्तं आगमाख्यं पुरोदितम् ॥
   तन्त्रसिद्धान्तसंज्ञं यद्दिव्यं परिकीर्तितम्। तन्त्रसिद्धं हि यच्छास्त्रं तत्सैद्धं समुदाहतम्॥
   तन्त्रान्तरं हि यत्प्रोक्तमार्य तत्समुदाहृतम्। पा.सं. 19.111-115
8. पाञ्चरात्ररक्षा.पृ.8
9. तापःपुण्ड्रस्तथा नाम मन्त्रो वागश्च पञ्चमः।
   अमीति पञ्चसंस्काराः परमेकान्तिहेतवः ॥